## (584) " जप व्यक्तायां वाचि " (I-भ्वादिः-397. सक. सेट्. पर.)

' जप मानसे च ' मनोनिर्वर्त्ये वचने— इत्यर्थः ।

जापकः-पिका, जापकः-पिका, जिजपिषकः-षिका, [1]जञ्जपकः-जन्जपकः-पिका ;

जपिता-त्री, जापयिता-त्री, जिजपिषिता-त्री, जञ्जपिता-जन्जपिता-त्री ;

[A]जपन्-न्ती, [2]व्यतिजपन्-न्ती, जापयन्-न्ती, जिजपिषन्-न्ती ; —

जपिष्यन्-न्ती-ती, जापयिष्यन्-न्ती-ती, जिजपिषिष्यन्-न्ती-ती ; —

— जापयमानः, — जञ्जप्यमानः-जन्जप्यमानः ;

— जापयिष्यमाणः, — जञ्जपिष्यमाणः-जन्जपिष्यमाणः ;

जप्-जब्-जपौ-जपः ; — — —

जपितम्-तः, [3]जप्तम् , जापितः, जिजपिषितः, जञ्जपितः-जन्जपितः-तवान् ;

जपः, [4]कर्णेजपः,[B] जापः, जिजपिषुः, जञ्जपः-जन्जपः, [5]जञ्जपूकः ;[C]

---

1. ' लुपसदचरजपजभदहदशगॄभ्यो भावगर्हायाम् ' (3-1-24) इति सूत्रेण गर्हितं जपतीत्यर्थे यङ् । द्विर्वचनम् , अभ्यासस्य, ' जपजभदहदशभञ्जपशां च ', (7-4-86) इत्यनेन नुगागमे, तस्य ' पदान्तवद्वाच्यः, (वा. 7-4-85) इति पदान्तवद्भावेन ' वा पदान्तस्य ' (8-4-59) इति पाक्षिके परसवर्णे रूपद्वयम् । एवं यङन्ते सर्वत्र रूपद्वयं ज्ञेयम् ।
2. ' प्रतिषेधे हसादीनामुपसंख्यानम् ' (वा. 1-3-15) इति वचनात् कर्मव्यतीहारेऽपि न शानच् ।
3. ' सेटोऽप्यस्य धातोः क्वचिदिड्भावेनापि प्रयोगो दृश्यते । तस्य साधुत्वकल्पनाय ' आदितश्च ' (7-2-16) इति सूत्रे, काशिकायां ' चकारोऽनुक्तसमुच्चयार्थः । आश्वस्तः । वान्तः ।' इत्युदाहरणं दत्तम् ।' तदिहानुसन्धेयम् । ' वमजप-व्याश्वसो निष्ठाया इड् वा' इति केचित् । जपितः जप्तः, इति प्रक्रियाकौमुदी ।
4. ' स्तम्बकर्णयो रमिजपोः' (3-2-13) इति सुबन्ते उपपदे अच्प्रत्ययः । ' तत्पुरुषे कृति बहुलम् ' (6-3-14) इति सप्तम्या अलुक् । ' हस्तिसूचकयोरिति वक्तव्यम्' (वा. 3-2-13) इति वचनात् कर्णेजपः इति सूचके एव साधुः ।
5. ' यजजपदशां यङः' (3-2-166) इति तच्छीलादिषु कर्तृषु यङन्तादूकप्रत्यये, ' यस्य हलः ' (6-4-49) इति यकारलोपे, अभ्यासस्य नुगागमे च रूपम् ।

A. ' आ तिष्ठद्गु जपन् सन्ध्यां प्रक्रान्तामायतीगवम् । ' भ. का. 4.14.

B. ' कर्णेजपैराहितराज्यलोभा स्त्रैणेन नीता विकृतिं लघिम्ना ।' भ. का. 3.7.

C. 'जन्मधामनि निजे नियमस्थं जञ्जपूकमभिसृत्य जघान॥' यादवाभ्युदये 21.40.